# एकविंशः पाठः

## सूक्तयः

सुष्ठु उत्तमा वा उक्तिः कथनं सूक्तिः, तस्याः बहुवचने सूक्तयः भवन्ति। सूक्तयः न्यूनतमपदैः आदर्शवचनानि भवन्ति। न केवलं संस्कृतेऽपितु विश्वसाहित्ये सूक्तीनां बाहुल्यं दरीदृश्यते। अत्र तासां सङ्ग्रहः पठनीयः स्मरणीयः च।

1. अप्राप्यं नाम नेहास्ति धीरस्य व्यवसायिनः।
2. अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति।
3. स्वभावो यादृशो यस्य न जहाति कदाचन।
4. न हि कल्याणकृत् कश्चिद् दुर्गतिं तात! गच्छति।
5. विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः।
6. मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः?
7. अल्पाक्षररमणीयं यः कथयति निश्चितं स खलु वाग्मी।
8. उपकृत्य निसर्गतः परेषामुपरोधं न हि कुर्वते महान्तः।
9. अयातपूर्वा परिवादगोचरं सतां हि वाणी गुणमेव भाषते।
10. पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः।
11. घनाम्बुना राजपथे हि पिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते।
12. ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः?
13. आलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्।
14. स्वामापदं प्रोज्झ्य विपत्तिमग्नं शोचन्ति सन्तो ह्युपकारिपक्षम्।
15. न नश्यति तमो नाम कृतया दीपवार्तया।

## शब्दार्थः

अप्राप्यम् = अलभ्यम्, व्यवसायिनः = उद्योगिनः, आप्तुम् = प्राप्तुम्, अर्हति = प्रभवति, जहाति = त्यजति, कल्याणकृत = हितकारी, विकारहेतौ = विकृतेः कारणे ,चेतांसि = मनांसि, परितुष्टे = सन्तुष्टे, अर्थवान् = धनवान्, अत्याक्षरम् = मिताक्षरम्, वाग्मी = वाक्पटुः, उपरोधम् = विरोधम्, निसर्गतः = स्वभावतः, अयातपूर्वा = पूर्वं न गता, परिवादगोचरम् – दूषणगोचरम्, पर्यायपीतस्य = नियमितक्रमेण पीतस्य शुक्लकृष्णपक्षरूपेण, हिमांशोः = चन्द्रस्य, घनाम्बुना = मेघजलेन, पिच्छिले = बहुले, अपथेन = कुमार्गेण, ऋते = विना, क्षपा = रात्रिः, तमस्काण्डः = गाढान्धकारः, मलीमसम् = मलिनम्, अलोकसामान्यम् = अलौकिकम्, प्रोज्झ्य = त्यक्त्वा, अचिन्त्यहेतुकम् = अचिन्त्यकारणम्, द्विषन्ति = द्वेषं कुर्वन्ति, मन्दाः = मूढाः, तमः = अन्धकारः, दीपवार्तया = दीपचर्चया।

# अभ्यासः

## प्रश्नवैविध्यम्

1. **एकपदेन उत्तरं लिखत-**

   क. कः दुर्गतिं न गच्छति ?

   ख. परेषाम् उपरोधं के न कुर्वन्ति ?

   ग. कस्य कलाक्षयः श्लाघ्यतरः वर्तते ?

   घ. तमः कया न नश्यति ?

2. **एकवाक्येन उत्तरं लिखत -**

   क. वाग्मी कः अस्ति ?

   ख. सन्तः कं शोचन्ति ?

   घ. कस्य इह अप्राप्यं नास्ति ?

3. **रिक्तस्थानानि पूरयत -**

   क. घनाम्बुना राजपथे हि ...................... क्वचिद्बुधैरप्यपथेन गम्यते ।

   ख. मनसि च ...................... कोऽर्थवान् को दरिद्रः ।

   ग. स्वभावो यादृशो यस्य न ...................... कदाचन ।

   घ. अयातपूर्वा ...................... सतां हि वाणी गुणमेव भाषते ।

   ङ. न नश्यति ...................... कृतया दीपवार्तया ।

4. **समुचितं मेलनं कुरुत -**

| | |
|---|---|
| क. धीरस्य | नभः |
| ख. पर्यायपीतस्य | मनसि |
| ग. मलीमसम् | व्यवसायिनः |
| घ. परितुष्टे | स्वभावः |
| ङ. यादृशः | हिमांशोः |

## भाषिककार्यम्

5. **विजातीयं रूपं पृथक् कुरुत -**

   क. भाषते, कुर्वते, पिच्छिले, विक्रियन्ते ।

   ख. नश्यति, द्विषन्ति, शोचन्ति, चेतांसि ।

   ग. परेषाम्, अर्थवान्, महात्मनाम्, सताम् ।

   घ. मनसि, राजपथे, परितुष्टे, ऋते ।

6. **अधोलिखितानां धातुलकारवचनानि लिखत-**

   क. जहाति　　　　ख. क्षमेत

   ग. कुर्वते　　　　घ. द्विषन्ति

   ङ. शोचन्ति

7. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत-**

क. नेहास्ति

ख. कोऽर्थवान्

ग. सुरैर्हिमांशोः

घ. क्वचिद्बुधैः

ङ. मन्दाश्चरितम्

8. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत-**

क. अप्राप्यम्

ख. कलाक्षयः

ग. राजपथे

घ. अयातपूर्वा

ङ. विकारहेतौ

9. **अधेलिखितानां प्रकृतिं प्रत्ययञ्च पृथक् कुरुत -**

क. उपकृत्य

ख. प्रोज्झ्य

ग. कृतया

घ. क्षालयितुम्

ङ. सति

10. **अव्ययपदानां वाक्येषु प्रयोगं कुरुत -**

क. नाम

ख. खलु

ग. ऋते

घ. हि

ङ. च

**योग्यताविस्तारः -**

❖ एताः सूक्तयः कुतः सङ्गृहीताः इति शिक्षकसाहाय्येन जानीहि।

❖ अन्यासां सूक्तीनां सङ्ग्रहणं कुरुत।

❖ स्वदैनिकव्यवहारे सूक्तीनां प्रयोगं कुरुत।

* * * * *

# व्याकरण-खण्डः

## रसपरिचयः

रस् धातोः अच् प्रत्ययात् 'रसः' इति शब्दस्य निष्पत्तिः भवति। रसो वै सः। रसं लब्ध्वाऽऽनन्दी भवति इत्यादि श्रुतेः। रसिकः काव्यं पठित्वा, श्रुत्वा, दृष्ट्वा वा यमानन्दं प्राप्नोति स रसः इत्युच्यते। अर्थात् काव्यस्य परिशीलनेन आत्मनि आनन्दस्य या अनुभूतिः भवति तस्याः नाम रसः।

आचार्यस्य विश्वनाथस्य मतानुसारेण रसः काव्यस्यात्मा अस्ति। तद्यथा –

**'वाक्यं रसात्मकं काव्यम्'।**

**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।**

अर्थात् विभावानाम्, अनुभावानां व्यभिचारिभावानां संयोगाद् यः स्थायिभावव्यक्तः भवति सः रसः इति उच्यते।

प्रायः अष्टौ स्थायिभावाः साहित्यशास्त्रे मन्यन्ते –

**रतिर्हासश्चशोकश्च क्रोधोत्साहौ भयं तथा।**
**जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः॥**

निर्वेदः अपि नवमः स्थायिभावः अस्ति –

**निर्वेदः स्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।**

एवं प्रकारेण – शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, वीभत्सः, अद्भुतः, शान्तः इत्येते नवरसाः भवन्ति।

उपर्युक्ताः स्थायिभावाः सामाजिकस्य हृदये स्थायिरूपेण सदा विद्यमानाः भवन्ति अत एव स्थायिभावाः कथ्यन्ते। सामान्यतः एते भावाः अव्यक्तावस्थायां भवन्ति किन्तु यदा स्थायिभावः समुचितैः विभावादिभिः पुष्टः भवति तदा रस्यमानः आस्वाद्यमानः वा भूत्वा रसरूपतां प्राप्नोति।

**विभावः –**

रसानुभूत्यां यानि कारणानि भवन्ति तानि एव विभावाः कथ्यन्ते। तस्य प्रकारद्वयं भवति आलम्बनविभावः उद्दीपनविभावश्च।

1. **आलम्बनविभावः –** यस्य आलम्बनं कृत्वा रसस्य निष्पत्तिः भवति सः आलम्बनविभावः कथ्यते, यथा– नायिकां दृष्ट्वा नायकस्य मनसि, नायकं दृष्ट्वा वा नायिकायाश्च मनसि रत्याः उत्पत्तिः भवति। अत एव नायकः नायिका वा शृङ्गाररसस्य आलम्बनविभावः कथ्यते।
2. **उद्दीपनविभावः –** चन्द्रिका-रात्रि-शून्यस्थान-प्रभृतिभिः तस्याः रत्याः उद्दीपनं भवति अतएव ते शृङ्गाररसस्य उद्दीपनविभावाः कथ्यन्ते।

एकैकस्य रसस्य आलम्बनविभावाः उद्दीपनविभावाः च पृथक्-पृथक् भवन्ति।

**अनुभावः -**

नायकस्य नायिकायाः वा ये वाचिकाः शारीरिकाः सात्विकाः च विकाराः भवन्ति ते अनुभावाः कथ्यन्ते।

**स्थायिभावाः तेषाम् अनुभावानाञ्च तालिका**

| स्थायिभावाः | अनुभावाः |
|---|---|
| रतिः | स्मितवदन-मधुरकथन-भ्रूक्षेप-कटाक्षादयः |
| हासः | रोमाञ्च-मुखविस्तार-अश्रुपात-प्रसन्नतादयः |
| शोकः | अश्रुपात-रोदन-वैवर्ण्य-स्वरभेदादयः |
| क्रोधः | भ्रूकुटिलता-नेत्रस्फार-वाक्कम्पादयः |
| उत्साहः | धैर्य-शौर्य-त्यागादयः |
| भयम् | हृदयकम्पन-स्तम्भ-मुखशोषादयः |
| जुगुप्सा | निष्ठीवन-मुखकूणन-नासाविकूणनादयः |
| विस्मयः | अनिमेषप्रेक्षित-भ्रूक्षेप-रोमहर्षणादयः |
| निर्वेदः | स्थिरचित्तता-विरक्ति-शमादयः |

**व्यभिचारिभावः -**

विविधम् आभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः। अर्थात् ये भावाः रसेषु नियमेन विना विचरन्ति तथा सर्वान् रसान् पुष्णन्ति ते व्यभिचारिभावाः कथ्यन्ते। व्यभिचारिभावानां सङ्ख्या त्रयस्त्रिंशत् (३३) अस्ति। तद्यथा- निर्वेदः, ग्लानिः, शङ्का, असूया, मदः, श्रमः, आलस्यम्, दैन्यम्, चिन्ता, मोहः, स्मृतिः, धृति, व्रीडा, चपलता, हर्षः, आवेगः, जडता, गर्वः, विषादः, औत्सुक्यम्, निद्रा, अपस्मारः, सुप्तम्, विबोधः, अमर्षः, अवहित्थम्, उग्रता, मतिः व्याधिः उन्मादः, मरणम्, त्रासः, वितर्कः।

## रस-भेदाः

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**वीभत्साद्भुतशान्ताश्च काव्ये नवरसाः स्मृताः॥**

1. **शृङ्गाररसः -** यत्र रतिस्थायिभावः परिपोषदशां प्राप्नोति तत्र शृङ्गाररसः। अस्य द्वौ भेदौ-संयोगो विप्रलम्भश्च।
संयोगशृङ्गारस्य उदाहरणम् -

**शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै**
**र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।**
**विस्त्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं**
**लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥**

एतद् संयोगशृङ्गाररसस्य उदाहरणम् अस्ति। अत्र नायकः आलम्बनविभावः, शून्यवासगृहम् उद्दीपनविभावः, मुखनिर्वर्णनम् अनुभावः, लज्जा, हासः, हर्षादयः व्यभिचारिभावाः सन्ति। अत्र रतिः स्थायिभावोऽस्ति।

विप्रलम्भशृङ्गारस्य उदाहरणम् -

**त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-**
**मात्मानं ते चरणपतितं यावदिछामि कर्तुम्।**
**अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे,**
**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥**

अत्र आलम्बन विभावः यक्षः, उद्दीपनविभावः आलेख्यदर्शनम्, व्यभिचारिभावश्च स्मृतिः, रतिः स्थायिभावश्च।

2. **हास्यरसः** – यत्र हासस्थायिभावः परिपोषदशां गच्छति तत्र हास्यरसः भवति। यथा –

**आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या,**
**मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे।**
**तारस्वनं प्रथितथूत्कमदात्प्रहारं**
**हा हा हतोऽहमिति रोदिति विष्णुशर्मा॥**

अत्र विष्णुशर्मा आलम्बन विभावः, रोदनम् उद्दीपनविभावः, स्मित-हसित-अतिहसितादयः अनुभावाः, हासः च स्थायिभावः।

3. **करुणरसः** – यत्र शोकस्थायिभावः परिपोषदशां गच्छति तत्र करुणरसः भवति। यथा –

**हा मातस्त्वरिताऽसि कुत्र किमिदं हा देवताः क्वाऽऽशिषः**
**धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ।**
**इत्थं घर्घरमध्यरूद्धकरुणाः पौराङ्गनानां गिर-**
**श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि॥**

अत्र मृतराजमाता आलम्बनविभावः, तस्याः दाहः उद्दीपनविभावः, रोदनम् अनुभावः, दैन्यग्लानि-मूर्च्छादयः व्यभिचारिभावाः सन्ति। शोकः स्थायिभावः।

4. **रौद्ररसः** – यत्र क्रोधस्थायिभावः परिपोषदशां गच्छति तत्र रौद्ररसः भवति। यथा –

**कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।**
**नरकरिपुणा सार्धं सभीमकिरीटिनामयमहमसृङ् मेदोमांसैः करोमि दिशां बलिम्॥**

अत्र अश्वत्थामा आलम्बन विभावः, भूभङ्गादयः अनुभावाः, शङ्कादयः व्यभिचारिभावाः क्रोधस्थायिभावं पुष्णन्ति अतः रौद्ररसः अस्ति।

5. **वीररसः** – यत्र उत्साहस्थायिभावः परिपोषदशां गच्छति तत्र वीररसः भवति। यथा –

**क्षुद्राः संत्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा**
**युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।**
**सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः**
**किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि॥**

अत्र रामः आलम्बनविभावः समुद्रबन्धनमुद्दीपनविभावः क्षुद्रवानराणामुपेक्षा रामस्य अन्वेषणप्रयासः वा अनुभावः, ऐरावतस्य गण्डस्थलभेदनस्य स्मृतिः, गर्वः उग्रता चेति व्यभिचारिभावाः सन्ति। उत्साहः स्थायिभावः अस्ति।

6. **भयानकरसः** – यत्र भयस्थायिभावः परिपोषदशां गच्छति तत्र भयानकरसः भवति।

**ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः**
**पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।**
**दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा**
**पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥**

अत्र हरिणः आलम्बनविभावः, रथवेगः उद्दीपनविभावः, हरिणस्य ग्रीवाभङ्गः अनुभावः, त्रास-श्रम-शङ्कादयः व्यभिचारिभावाः सन्ति। भयः स्थायिभावः अस्ति।

7. **वीभत्सरसः** – यत्र जुगुप्सास्थायिभावः परिपोषदशां गच्छति तत्र वीभत्सरसः भवति। यथा –

उत्कृत्योत्कृत्य कृत्तिं पृथममथ पृथूत्सेधभूयांसि मांसा
न्यंसस्फिक् पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।
आर्त्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कःकरङ्का –
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥

अत्र दरिद्रप्रेतः आलम्बनविभावः, कृत्योत्कर्त्तनं मांसभक्षणं वा उद्दीपनविभावः, श्वासावरोधनं मुखवैपरीत्यं च अनुभावौ, उद्वेगः व्यभिचारिभावः च सन्ति। जुगुप्सा स्थायिभावः अस्ति।

8. **अद्भुतरसः** – यत्र विस्मयः स्थायिभावः परिपोषदशां गच्छति तत्र अद्भुतरसः भवति। यथा –

चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैवभङ्गिः।
लोकोत्तरं धैर्यमहो प्रभावः काऽप्याकृतिर्नूतन एष सर्गः॥

अत्र वामनः आलम्बनविभावः, कान्तिः, गुणातिशयः, लोकोत्तरधैर्यं च उद्दीपनविभावाः, स्तुतिः अनुभावः। मतिधृति हर्षादयःव्यभिचारिभावाः सन्ति। विस्मयः स्थायिभावः अस्ति।

9. **शान्तरसः** – यत्र निर्वेदस्थायिभावः परिपोषदशां गच्छति तत्र शान्तरसः भवति। यथा –

अहौ वा हारे वा कुसुमशयने वा दृषदि वा,
मणौ वा लोष्ठे वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः,
क्वचित् पुण्यारण्ये शिव-शिव-शिवेति प्रलपतः॥

अत्र संन्यासी आलम्बनविभावः, तपोवनम् उद्दीपनविभावः, समबुद्धिः अनुभावः धृतिमतिहर्षादिव्यभिचारिभावाः सन्ति। निर्वेदः स्थायिभावः अस्ति।

* * * * *

# छन्दो विवेचनम्

**गणपरिचयः -**

पद्यरचनायां छन्दसः प्रयोगो भवति। छन्दोरहितं संरचनं गद्यमित्युच्यते, छन्दोबद्धं नियमितं संरचनं तु पद्यमिति कथ्यते। पद्यरचनायां कविः स्वभावाभिव्यक्तये सम्बद्धितच्छन्दसः नियमानुसारमेव समुचितमात्रोपेतं वर्णसमूहं चिनोति अतः छन्दसः सम्यग् अवधारणार्थं निम्नाङ्कितानां ज्ञानं नितान्तम् आवश्यकम् अस्ति।

**पादज्ञानम् -** श्लोकस्य एकचतुर्थांशः तु पादः चरणं वा इत्युच्यते। तदेवं श्लोकस्यैकस्य चत्वारः पादाः भवन्ति। एतेषु चतुर्षु पादेषु प्रथम-तृतीयौ विषमौ, द्वितीय-चतुर्थौ च समौ उच्यन्ते।

**गणज्ञानम् -** वार्णिकछन्दसां विवेचनाय गणपरिचयः अथ च गुरुलघुज्ञानम् आवश्यकम् भवति। छन्दश्शास्त्रे गणस्यार्थः भवति वर्णानां समूहः इति। गणाः अष्टौ भवन्ति। प्रत्येकं गणे त्रयः वर्णाः भवन्ति। गणस्याभिधानार्थं निम्नाङ्कितं सूत्रमत्यन्तमुपादेयम् - **यमाताराजभानसलगाः।**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| । | ऽ | ऽ | ऽ | । | ऽ | । | । | । | ऽ |
| य | मा | ता | रा | ज | भा | न | स | ल | गाः |

| गणनाम | अक्षराणि | चिह्नानि | उदाहराणि |
|---|---|---|---|
| यगणः | यमाता | । ऽ ऽ | भवानी |
| मगणः | मातारा | ऽ ऽ ऽ | पाञ्चाली |
| तगणः | ताराज | ऽ ऽ । | देवेश |
| रगणः | राजभा | ऽ । ऽ | भारती |
| जगणः | जभान | । ऽ । | दयालु |
| भगणः | भानस | ऽ । । | गौरव |
| नगणः | नसल | । । । | कमल |
| सगणः | सलगाः | । । ऽ | पृथिवी |

उपर्युक्तैः एतै अष्टगणैः सह लघुः इत्यस्य ल वर्णं गुरुः इत्यस्य ग वर्णं च आदाय प्रस्तुतमिदं सूत्रं निर्मितम्।

**लघु-गुरुज्ञानम् -** स्वरूपदृष्ट्या वर्णानां भेदद्वयमिति निश्चितम् 1. लघुः 2. गुरु इति। यः वर्णः मात्रादृष्ट्या ह्रस्वः भवति, सःलघुरित्युच्यते, यस्तु दीर्घः सः गुरुरिति कथ्यते। यस्मिन्वर्णे ह्रस्वस्य दीर्घस्य चाभावः तस्य परिगणनं नैव क्रियते। यथा क्, च्, प् चेत्यादयः वर्णाः। तदेवं लघुवर्णस्य कृते एकस्याः मात्रायाः गुरुवर्णस्य कृते च मात्राद्वयस्य परिग्रहणं भवति। तत्र लघुः = 1, गुरुश्च = ऽ, इति चिह्नाभ्यां निर्दिश्यते।

लघु-गुरुवर्णयोः सामान्यनियमस्तु उपर्युक्त एव। तत्र केचन विशिष्ट नियमा अपि छन्दः शास्त्रविद्भिः सुनिश्चिताः सन्ति, एषां परिज्ञानं निम्नलिखितया कारिकया स्पष्टं जायते -

**सयुक्ताद्यं दीर्घं सानुस्वरं विसर्गसम्मिश्रम्।**
**विज्ञेयमक्षरं गुरुं पादान्तस्थं विकल्पेन॥**

अर्थात् संयुक्तवर्णस्य पूर्ववर्तिवर्णः गुरु इति कथ्यते। यथा 'संयुक्ताद्यं' इति पदे यु इति लघुवर्णः 'संयुक्तवर्णस्य' 'क्ता' इत्यस्य पूर्ववर्तित्वाद् गुरुत्वमुपयाति।

- अनुस्वारेण विसर्गेण वा सह युक्तः वर्णः गुरु इति व्यपदिश्यते। यथा 'संयुक्ताद्यम्' इत्यत्र सं 'इति वर्णः अपि च 'कर्णः' इत्यत्र 'र्णः' इति वर्ण- अनुस्वारेण विसर्गेण च साकं युक्तत्वाद् गुरुत्वम् अधिगच्छतः।

- पादस्य/चरणस्य अन्तिमः वर्णः विकल्पेन अर्थात् पक्षे गुरुः विपक्षे च लघुः व्यपदिश्यते। यथा – 'विकल्पेन' 'इत्यस्मिन्' पदे 'न' इति लघुवर्णः पदान्तवर्तित्वाद् गुरुवर्णत्वेन इष्यते।

**यतिज्ञानम् –** श्लोकपाठसमये श्वासग्रहणार्थं लयसम्पादनार्थं वा यद्विरम्यते तदेव 'यतिः' 'विरामो' वेति संज्ञाम् आदधति। अतस्तत्र छन्दोविवेचने यतिज्ञानं नितान्तमपेक्षणीयम्।

## छन्द-ज्ञानम्

छन्दः वर्णम् मात्राम् वा आश्रित्य विभज्यते। अतः एतत् द्विधा भवति-वार्णिकछन्दः, मात्रिकछन्दः इति। वार्णिकच्छन्दसि गुरु-लघु-वर्णानाम् अर्थात् गणव्यवस्थायाः महत्त्वं वरीवर्त्ति, परन्तु मात्रिकच्छन्दसि मात्राणां परिगणनमेव प्रामुख्यं भजते। लौकिक संस्कृते मात्रिकच्छन्दसां सङ्ख्याऽत्यल्पा दृश्यते। परन्तु वार्णिकच्छन्दसां प्रयोगः भृशं परिलक्ष्यते। मात्रिकच्छन्दस्सु आर्या गीतिर्वा प्रामुख्यं भजते।

### वार्णिकछन्दस्य प्रमुखभेदाः –

| | |
|---|---|
| अनुष्टुप्, | उपजातिः, |
| वंशस्थं, | मालिनी, |
| शिखरिणी, | शार्दूलविक्रीडितम्, |
| मन्दाक्रान्ता | वसन्ततिलका। |

- **अनुष्टुप् –** अस्मिन् प्रत्येक पादे अष्ट वर्णाणि भवन्ति। षष्टम् वर्णम् सदैव गुरु पञ्चम् वर्णम् लघुञ्च भवति। सप्तम् वर्णम् द्वितीये चतुर्थे च पादे लघु भवति। प्रथमे तृतीये च गुरु इति।

**पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।**
**गुरुः षष्ठं च जानीयात् शेषेष्वनियमो मतः॥**

यस्मिन् श्लोके प्रत्येक चरणे अष्टवर्णाः भवति। पञ्चमो वर्णः लघुः भवति षष्ठो वर्णः गुरुः भवति। सप्तमो वर्णः प्रथमतृतीयचरणयोः गुरुर्भवति। द्वितीयचतुर्थकयोः चरणयो सप्तमो वर्णः लघुः भवति। यथा –

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**

- **अनुष्टुप् (लौकिकछन्दः)**

**श्लोके षष्ठं गुरुं ज्ञेयं सर्वत्र लघु पञ्चकम्।**
**द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥**

यस्मिन् श्लोके प्रत्येकचरणस्य षष्ठो वर्णः गुरुः भवति। पञ्चमो वर्णश्च लघुः भवति, द्वितीयचतुर्थयोः चरणयोः सप्तमो वर्णः लघुः भवति। प्रथमतृतीयचरणयोस्तु सप्तमो वर्णः गुरुर्भवति। यथा –

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥**

- **उपजातिः –** अस्मिन् प्रत्येक पादे एकादश वर्णानि भवन्ति।

**अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ता।**
**इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम॥**

इन्द्रवज्रा-उपेन्द्रवज्रा छन्दसोः पादौ मिलित्वा एव उपजातिच्छन्दः लक्ष्ममतां भजते। उपजातेः तात्पर्यमपि इत्थमेव यत् एकस्या एव जातेः छन्दोद्वयं मिलित्वा छन्दसमिदं लक्षयति। यस्मिन् श्लोके प्रथम-तृतीय चरणयोः इन्द्रवज्रा द्वितीय-चतुर्थ पादयोः उपेन्द्रव्रजा छन्दः भवति। यथा –

1. अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य,
स्थितः पृथिव्या इव मानदण्डः॥

2. जलं प्रसन्नं कुसुमं प्रहासं,
क्रौञ्चस्वनं शालिवनं विपक्वम्।
मृदुश्च वायुर्विमलश्च चन्द्रः,
शंसन्ति वर्षव्यपनीतकालम्॥

- **वंशस्थछन्दः** – यस्य छन्दसः प्रतिपादं क्रमशः जगणः तगणः रगणः स्यात् तत् वंशस्थछन्दः भवति।

'जतौ तु वंशस्थमुदीरितं जरौ।'

| जगणः | तगण | जगण | रगण |
|---|---|---|---|
| । ऽ। | ऽ ऽ । | । ऽ । | ऽ । ऽ |

उदाहरणम् –

। ऽ । ऽऽ । । ऽ ।ऽ। ऽ
1. तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता॥

। ऽ । ऽऽ । ऽ।ऽ । ऽ। ऽ
2. विधाय रक्षान् परितः परेतरा-
नशङ्किताकार मुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः॥

- **वसन्ततिलका** – यस्य पद्यस्य प्रतिचरणं यथाक्रमं तगणः (ऽऽ।) भगणः (ऽ।।) जगणः (।ऽ।) जगणः (।ऽ।) गुरुवर्णद्वयञ्च भवति, तदेव वसन्ततिलका नाम्नाऽभिधीयते।

'उक्ता वसन्ततिलका तभजाजगौगः।'

उदाहरणम् –

ऽ ऽ । ऽ ।ऽ । ऽ ऽ । ऽ ऽ
1. त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमिहोत्तरेण॥

2. जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गतिः कथय किं न करोति पुंसाम्॥

- **मालिनी** – यस्य पद्यस्य प्रत्येकस्मिन् पादे यथाक्रमं नगणः, नगणः मगणः, यगणः यगणः इत्येते पञ्चगणाः भवन्ति तथा च अष्टमेऽक्षरे सप्तमे च यति र्भवति, तत्पद्यं मालिनीति उच्यते।

**'ननमयययुतेयं मालिनी भोगिलोकैः।'**

उदाहरणम् –

।। । । । ऽ ऽ ऽ । ऽ । ऽ ऽ
1. सरसिजमनुविद्धं शैवलेनापि, रम्यम्,
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी,
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

2. किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं,
शरदिज इव धर्मः केतकीगर्भपत्रम्॥

- **शिखरिणी** – यस्य छन्दसः प्रत्येकस्मिन् पादे यथाक्रमं यगणः (।ऽऽ) मगणः (ऽऽऽ), नगणः (।।।) सगणः (।।ऽ), भगणः (ऽ।।) एकः लघु वर्णः एकः गुरुवर्णश्च भवति तत् शिखरिणीति नाम्ना अभिधीयते।

**'रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।'**

उदाहरणम् –

। ऽऽ ऽ ऽऽ । । । । । ।ऽऽ । । । ऽ
1. अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥

2. लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रवलयन्।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन,
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि॥

- **शार्दूलविक्रीडितम्** – यस्य पद्यस्य प्रतिचरणं यथाक्रमं मगणः (ऽऽऽ) सगणः (।।ऽ) जगणः (।ऽ।) सगणः, तगणः (ऽऽ।) तगणः एकः गुरुवर्णश्च भवन्ति, अपि च द्वादशतमे अक्षरे सप्तमेऽक्षरे च यतिर्भवति तत् शार्दूलविक्रीडितमिति कथ्यते।

**'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।'**

उदाहरणरम् –

ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ ऽ ऽ ऽ ऽ । ऽ

1. या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युत शङ्करप्रभृतिभिः देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजड्यापहा॥

2. यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः।
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः॥

- **मन्दाक्रान्ता** – यस्य छन्दसः प्रतिचरणं यथाक्रमं मगणः (ऽऽऽ) भगणः (ऽ।।) नगणः (।।।) तगणः (ऽऽ।) तगणः (ऽऽ।), गुरुवर्णद्वयञ्च भवति, तथा च चतुर्थे वर्णे षष्ठे वर्णे सप्तमे वर्णे च यतिर्भवति, तत् मन्दाक्रान्ता इति नाम्ना अभिधीयते।

'मन्दाक्रान्ता जलधिषडगैम्भौं न तौ ताद् गुरूचेत्।'

ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

1. नन्वात्मानं बहु विगणयन्नात्मना नावलम्बे,
तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा,
नीचैगच्छत्युपरि च दशा चक्रनेमिक्रमेण॥

2. शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं,
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं,
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥

* * * * *

# अलङ्कारप्रकरणम्

अलङ्क्रियते अनेन इति अलङ्कारः। यानि तत्त्वानि काव्यस्य सौन्दर्यं वर्धयन्ति तानि अलङ्काराः कथ्यन्ते।

उक्तञ्च दण्डिना – **काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।**

अलङ्काराणां काव्ये महन्महत्त्वम्। 'न कान्तमपि निर्भूषं विभाति वनिताननम्।' गुणगौरवसम्पन्नाऽपि वनिता यथा सालङ्कारैव शोभते, न तथाऽलङ्कारविहीना। एवमेव शब्दार्थयोः सौन्दर्याधायकं तत्त्वम् अलङ्कारः।

यद्यपि काव्यात्मरूपेण साम्प्रतं नास्य महत्त्वम्, तथापि शब्दार्थशरीरस्य बाह्यसौन्दर्यवर्धनेन समं रसादीनपि पोषयति। अलङ्कारस्य काव्ये तादृशं महत्त्वं यथा शरीरेऽलङ्काराणां वस्त्रादीनां वा। यथा सकलगुणसमन्वितोऽपि मानवो निर्वसनो न शोभते यथा वा अलङ्काररहिता नारी न शोभते तथैवालङ्कारहीनं काव्यम् अपि न शोभते।

## अलङ्काराणां भेदाः

शब्दार्थदृष्ट्या अलङ्काराः त्रिधा विभज्यन्ते –

1. **शब्दालङ्कारः** – शब्दाश्रितः अलङ्कारः शब्दालङ्कारः कथ्यते। यथा– अनुप्रासादयः। शब्दालङ्कारे शब्दपरिवर्तनेनालङ्कारक्षतिः।
2. **अर्थालङ्कारः** – अर्थाश्रितः अलङ्कार अर्थालङ्कारः कथ्यते। यथा– उपमारूपकोत्प्रेक्षादयः। अर्थालङ्कारे तु शब्द परिवर्तने सत्यपि नालङ्कारहानिः।
3. **उभयालङ्कारः** – उभयालङ्कारे श्लेषो गृह्यते, शब्दालङ्कारत्वाद् अर्थालङ्कारत्वाच्च।

यद्यपि अलङ्काराः बहवः सन्ति किन्तु पाठ्यक्रमानुसारम् अलङ्कारस्य भेदाः प्रस्तूयन्ते।

- **अनुप्रास-अलङ्कारः** – वर्णसाम्यमनुप्रासः। वर्णानां साम्यम् अर्थात् वर्णसादृश्यम् अनुप्रासः। स्वरवर्णानाम् असाम्यत्वेपि व्यञ्जनवर्णानां सादृश्यं यत्र, तत्र अनुप्रास-अलङ्कारः भवति। यथा–

1. **वहन्ति वर्षन्ति नदन्ति भान्ति, ध्यायन्ति नृत्यन्ति समाश्वसन्ति।**
   **नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः॥**
2. **अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।**
   **अलमलमालि! मृणालैरिति वदति दिवानिशं बाला॥**

अत्र प्रथमे श्लोके 'न्ति' सादृश्यं तथा द्वितीये श्लोके रकारस्य लकारस्य च सादृश्यं जातम् अतः अत्र अनुप्रासः अलङ्कारः अस्ति।

- **यमक-अलङ्कारः** – अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः यमकम्। यत्र सार्थकपदस्य पुनरावृत्तिः भवति किन्तु अर्थः पृथक्-पृथक् भवति तत्र यमक-अलङ्कारः भवति। यथा –

1. **प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम्।**
   **यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः॥**
2. **सन्नारीभरणोमायमाराध्य विधुशेखरम्।**
   **सन्नारीभरणोमायस्ततस्त्वं पृथिवीं जय॥**

अत्र प्रथमे श्लोके 'हिमवान्' इति पदस्य आवृत्तिः अस्ति तथा अर्थः भिन्नः भिन्नः अस्ति। एकः अर्थः हिमाच्छादितः अपरः हिमालयगिरिः चास्ति।

द्वितीये श्लोके 'सन्नारी' इति पदस्य आवृत्तिः अस्ति तथा अर्थः भिन्नः भिन्नः अस्ति। एकः अर्थः उमापक्षे अपरः अर्थः राज्ञः पक्षे चास्ति।

- **श्लेष-अलङ्कारः** - श्लिष्टैः पदैरनेकार्थाभिधाने श्लेषः इष्यते।

श्लिष्यते अर्थः यत्र सः श्लेषः। यत्र एकस्य शब्दस्य अनेकार्थाः श्लिष्टाः भवन्ति तत्र श्लेष-अलङ्कारः भवति। यत्र शब्दे अर्थः श्लिष्टः भवति तत्र शब्दश्लेषः। तथा यत्र अर्थे अन्यः अर्थः श्लिष्टः भवति तत्र अर्थश्लेषः।

**शब्दश्लेषः** -

**सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः।**
**नयोपकारसाम्मुख्यमायासि तनुवर्तनम्॥**

अत्र 'सर्वस्वम्' इत्येकं पदं किन्तु अर्थद्वयम् भवति। शिवपक्षे सर्वशक्तिमान् चौरपक्षे च धनधान्यादिकम् इत्यर्थः।

**अर्थश्लेषः**

**स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।**
**अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च॥**

अत्र स्तोक-उन्नति-अधोगति-इत्यादिषु पदेषु अर्थश्लेषः अस्ति।

- **उपमा-अलङ्कारः** - साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः। साधर्म्यमुपमा भेदे। उपमेयोपमानयोः परस्परं भिन्नत्वे सत्यपि तयोः गुणक्रियादिकस्य साधारणधर्मस्य साम्यत्वे सति उपमा भवति। उपमा द्विविधा- पूर्णोपमा, लुप्तोपमा च।

    ✻ उपमान-उपमेय-साधारणधर्म-उपमावाचकानां सर्वेषाम् उपादानानां ग्रहणं यत्र भवति तत्र पूर्णोपमा भवति।

**स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।**
**प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा॥**

अत्र स्वाधानपतिका उपमानं, विजयश्रीः उपमेयः, न मुञ्चति साधारणधर्मः, यथा उपमावाचकः च। पद्ये एतानि सर्वाणि उपादानानि सन्ति। विजयश्रीः स्वाधानपतिका इत्यनयोः भिन्नत्वे सति साधारण धर्मेण साम्यत्वं कृतम् अतः अत्र पूर्णोपमा अस्ति।

    ✻ उपमान-उपमेय-साधारणधर्म-उपमावाचकेषु कस्यचिदेकस्य द्वयोः त्रयाणां वा लोपः भवति तत्र लुप्तोपमा भवति। यथा -

**धन्यस्थानन्यसामान्यसौजन्योत्कर्षशालिनः।**
**करणीयं वचश्चेतः सत्यं तस्यामृतं यथा॥**

अत्र अमृतम् उपमानं, वचः उपमेयः, यथा उपमावचकः, अस्ति किन्तु अमृतस्य वचनस्य च एतयोः द्वयोः अमरता इति साधारणधर्मः लुप्तः अतः लुप्तोपमा।

- **रूपक-अलङ्कारः** - तद्रूपकमभेदो यः उपमानोपमेययोः। उपमानोपमेययोः भेदे सति तयोः समानधर्मत्वात् अभेदारोपः रूपकम्। यथा -

1. **अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।**
   अत्र 'चन्द्रमुख' शब्दे रूपक-अलङ्कारः अस्ति।
2. **अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्।**
   अत्र राज्ञः शिवस्य च अभेदकल्पनया रूपक अलङ्कारः अस्ति।

- **उत्प्रेक्षा-अलङ्कारः** - सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् - प्रकृतस्य समेन यत् सम्भावनं तत् उत्प्रेक्षा। यत्र उपमानेन अर्थात् प्रसिद्धवस्तुना सह उपमेयस्य अर्थात् वर्णनीयविषयस्य उत्प्रेक्षणम् अर्थात् सम्भावनं क्रियते तत्र उत्प्रेक्षा-अलङ्कारः भवति। यथा -

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥**

अत्र श्लोके मन्ये अन्धकारोऽङ्गानि लेपयति, मन्ये च गगनम् अञ्जनं वर्षति, असत्पुरुषस्य सेवेव दृष्टिरपि निष्फला जाता इत्यर्थः अतएव उत्प्रेक्षा अलङ्कारः अस्ति।

उत्प्रेक्षा-बोधकशब्दाः - मन्ये, शङ्के, ध्रुवम्, प्रायः, नूनम्, इव इति एतेषां वाचकशब्दानां संयोजनेनैव उत्प्रेक्षायाः बोधो भवति।

- **अर्थान्तरन्यास-अलङ्कारः** - यत्र समानधर्मेण वैधर्म्येण वा सामान्यवस्तुनः विशिष्टवस्तुना विशिष्टवस्तुनः सामान्यवस्तुना वा समर्थनं क्रियते अर्थात् सोपत्तिकतया दृढीक्रियते, तत्र अर्थान्तरन्यासोऽलङ्कारः भवति।

**सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।**
**यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥**

✻ सामान्येन विशिष्टस्य समर्थनम्। यथा -

**निजदोषावृतमनसामतिसुन्दरमेष भाति विपरीतम्।**
**पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥**

अत्र निजदोषेत्यादि सामान्यस्य शङ्खगतपीतिमारूपविशिष्टेन समर्थनं कृतम् अतः अत्र अर्थान्तरन्यास-अलङ्कारः अस्ति।

✻ विशिष्टेन सामान्यस्य समर्थनम्। यथा -

**गुणवद्वस्तुसंसर्गाद् याति स्वल्पोऽपि गौरवम्।**
**पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते॥**

अत्र श्लोकस्य प्रथमवाक्ये 'गुणवद्वस्तुसंसर्गाद्'। इति विशिष्टस्य पुष्पमाला इति सामान्येन समर्थनं कृतम् अतः अत्र अर्थान्तरन्यास-अलङ्कारः अस्ति।

✻ ✻ ✻ ✻ ✻

# कथासंयोजनम् / अनुच्छेदलेखनम् / क्रमसंयोजनम् / संक्षिप्तवर्णनम् /प्रश्ननिर्माणम्

## ● कथासंयोजनम्

1. (आश्रमे, शिष्येषु, विनम्रः, सफला, ऋषिः, जलं, गुरोः, कर्तुं)

कस्मिंश्चिद् तपोवने धौम्यानामा ...................... अवसत्। तस्य ................. विद्यार्थिनः विद्याध्ययनार्थम् आगच्छन्ति स्म। तेषु .............. आरुणिः अपि अन्य आसीत्। सः सौम्यः ................ सरलहृदयश्च आसीत्। एकदा ऋषिः तं वर्षर्तौ आश्रमस्य क्षेत्रेषु ................. रोद्धुं अप्रेषयत्। आरुणिः .................. आज्ञां स्वीकृत्य तथा ................. क्षेत्रम् अगच्छत्। गुरोः आज्ञा कथं ................ भवेत् इति विचार्य सः निजशरीरमेव बन्धस्थाने अस्थापयत्।

2. (श्रुत्वा,सिद्धार्थस्य, शरीरात्, हंसम् निपातितः, उपवनं, हंसः, मम)

एकदा राजकुमारः सिद्धार्थः विहारार्थम् ............. गतः। सहसा क्रन्दनध्वनिं ................ स इतस्ततः अपश्यत्। बाणेन विद्धः एकः ................ भूमौ पतितः आसीत्। एतत् दृष्ट्वा ................ चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य .................. बाणं निष्कास्य तम् अङ्के अधारयत्। अत्रान्तरे धावन् देवदत्तः तत्र प्राप्तः। सिद्धार्थस्य हस्ते ................... दृष्ट्वा सः उच्चैः अवदत्- ''सिद्धार्थ! एषः हंसः मया बाणेन ..............। अतः मह्यम् देहि।''

## ● अनुच्छेदलेखनम्

1. (षट्, भवति, प्रमोदो, नृत्यन्ति, वसन्तः, उत्सवौ, नराः, पूर्णिमायां, हर्षातिरेकेण)

भारते .................. ऋतवः सन्ति। तेषु ............... ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तः ...........। वसन्तौ द्वौ प्रमुखौ ................ भवतः - वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र ............. भवति। ................ नार्यश्च सर्वत्र गायन्ति ................ च। होलिकोत्सवः फाल्गुनमासस्य ............... भवति। ............... नराः, नार्यः, युवानः, वृद्धाः, बालकाश्च प्रसन्नाः भवन्ति।

2. (आधारोऽस्ति, पर्यावरणं, आक्सीजनवायुं, कार्बनडाइअक्साइडवायु, स्वस्थं, वृक्षाः, कुर्वन्ति, वायुं, आक्सीजनवायुं)

स्वस्थं पर्यावरणम् अस्माकं जीवनस्य ................। पर्यावरणस्य चाधाराः पुष्पिताः पल्लविताः ........... भवन्ति। वृक्षाः ........... स्वस्थं कुर्वन्ति। ते मानवैः परित्यक्तान् वातावरणे च प्रसृतान् अन्यान् प्रदूषितान् वायून् उदस्थान् .................। प्रत्येकं प्राणी श्वसनक्रियायां ............ गृह्णाति। कार्बनडाइअक्साइड ................ बहिः विसृजति। वृक्षाः च ................ गृहणान्ति ............ च विसृजन्ति। अनेन पर्यावरणं ........... भवति।

## सङ्केताधारित अनुच्छेदलेखनीयम्

1. भग्नः, स्वभावकृपणः, सम्पूरितः, दुर्भिक्षं, यूथः, महिषीः, भविष्यति, प्रहारं, कलशः, अजाद्वयं, सुवर्णेन, भविष्यति, करिष्यामि, श्रोष्यति रूपाढ्यां।
2. तपस्वी, भ्रमति, परिभ्रमन्, शुकः, ऋषिः, अगच्छत्, लोककल्याणार्थम्, गृहे, दृष्ट्वा, आश्चर्यसागरे, उक्तवान्।